क्षन्तुमर्हन्ति विद्वान न कस्य स्खलितमन ॥

महाभवगुप्तजनमेजयका ताम्रपत्र ।

(कोशलदेशे **पोवा** विषयीय **रण्डा** ग्राम-दान)

ॐ स्वस्ति । श्रीमत **आरास** समावासितो विजयकटकात । परमभट्टारक महाराजाधिराजपरमेश्वर श्रीशिवगुप्तदेवपादानुध्यात परममाहेश्वर परमभट्टारक महाराजाधिराज परमेश्वर **सोमकुलतिलकः त्रिकलिङ्गाधिपति** महाराजाधिराज **श्रीमहाभवगुप्तदेवः** कुशली । कोशल देशे पोवा विषयीय **रण्डा** ग्रामे तथा **अलाण्डला** ग्रामे ब्राह्मणान संपूज्य तद्द विषयीयान यथाकालाध्यासिनः समाहर्तृ सन्निधातृ नियुक्तकाधिकारिकदण्डपाशिकचाटभटपिशुनवेत्रिकावरोधजनराणक राजपुत्रराजवल्लभादीन सर्व्वान समाज्ञापयति । विदितमस्तु भवता यथास्माभिरयं ग्राम. सनिधि सोपनिधि × × × × × सगर्तोषर. सजलस्थलसहित प्रतिनिषिद्ध-चाटभट प्रवेशः । **टकारि**-विनिर्गताय **कोशले** तुरुवुनावास्तव्याय भरद्वाज गोत्राय वार्हस्पत्याङ्गिरसप्रवराय वाजसनेयशाखाध्यायिने भट्ट **श्रीमहत्तम साधारणाय** भट्ट **श्रीशोभन** सुताय सलिलधारा पुरस्सरमाचन्द्रतारकार्क इत्यादि ।

महाभवगुप्तजनमेजयके ३१ वे संवत्सर मे प्रदत्त

(तुलेण्डा ग्राम दान)

चौद्वार (कटक) में प्राप्त ताम्र शासन ।

ॐ स्वस्ति । श्रीमत् आराम समावसित श्रीमतोविजय कटकात । परमभट्टारक महाराजाधिराज परम श्वर **श्रीशिवगुप्त** पादानुध्यात प भ म प मो तु नि त्रि म **श्रीमहाभवगुप्त** राजदेव कुशली ।

कोशल देश सम्मानि विषयीय **तुलेण्डा** ग्राम **टकारि** विनिर्गताय **कोशले** सर्वाभाशून्याय भरद्वाजगोत्राय वार्हस्पत्याङ्गिरसप्रवराय वाजसनय शाखाध्यायिन भट्ट **श्रीमहोत्तम साधारणाय** भट्ट श्रीनगरवसुनाय ।

श्रीमहाभवगुप्त पादपद्मप्रवद्धमान विजयराज्य **एकत्रिंशत्तमे** संवत्सर मार्गशीष शुक्लत्रयोदशीदिन

Composer मन्कदत्त

Engraver माधव

महाभवगुप्त जनमेजयराजदेव के वकतेन्तली-ताम्रपत्र

ॐ स्वस्ति । **सुवर्णपुर** समावासित श्रीमतो विजयस्कन्धावारात । परम भट्टारक महाराधिराज परम श्वर श्रीशिवगुप्तपादानुध्यात परममाहेश्वरपरमभट्टारकमहाराजाधिराज परम श्वर सोमकुल तिलक **त्रिकलिङ्गाधिपति श्रीमहाभवगुप्तराजदेव** कुशली । उपत्तरा खण्डीय **वकतेन्तलीग्रामे** ब्राह्मणान सम्पूज्य तत्र प्रतिनिवासि कुटुम्बिनस्तन्निविषयीय यथा कालाध्यासिन समाहर्त सन्निधातृ दण्डपाशिक पिशुन वेत्रिकावरोधजन राजवल्लभादीनन्यांश्च चाटभटजातीयान सर्वान्समादिशति विदितमस्तु भवताम् यथा अस्माभिरय ग्राम सनिधि सोपनिधि सर्वबाधाविवर्जित साततापर मत्स्यसमेत सगर्तोषर सर्वोपरिकरादानसहित प्रतिनिषिद्ध चाटभटप्रवेश स्वसीमा

पर्यन्तः कौण्डिन्य गोत्राय मंत्रा वरुणा वसिष्ठ प्रवराय छन्दोग चरणाय राढावंवल्लिकन्दर-विनिर्गताय **मेरण्डा**वास्तव्याय भट्टपुत्राय **जातरूप** नाम्ने भट्टपुत्राय **श्रीवत्ससूनवे** सलिलधारापुरःसरमाचन्द्रतारकार्कक्षितिसमकालोपभोगार्थं मातापित्रोरात्ममनश्च पुण्य-यशोभिवृद्धये विशुमति संक्रान्त्यां ताम्रशासनेनाकरीकृत्य प्रतिपादित इत्यवगत्य समुचितभोगभागकरहिरण्यादिकमुपनयद्भिर्भवद्भि' सुखेन प्रतिवस्तव्यमिति। भाविभिश्च भूपतिभिराहत्तिरियमस्मदीय धर्मगौरवादस्मयनुरोधाच्च स्वदत्तिरिवानुपालनीया। तथा चोक्तम् धर्मशास्त्रे

बहुभिर्वसुधादत्ता राजभि सगरादभिः
यस्य यस्य यदा भूमिस्तस्य तस्यनदा फलम् ॥
माभूदफलशङ्कावः परदत्तेति पार्थिवा ।
स्वदानात्फलमानत्यम्परदत्तानु पालने ॥
षष्टिं वर्ष सहस्राणि स्वर्गे मोदति भूमिद ।
अक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् ॥
अग्नेरपत्यं प्रथमं सुवर्णं
भूर्वैष्णवी सूर्यसुताश्च गावः
यः काञ्चनम् गाञ्च महीञ्च दद्यात्
दत्तास्त्रयः तेन भवन्ति लोकाः ॥
अस्फोटयन्ति पितरः प्रवल्गयन्ति पितामहा.
भूमिदत्ताकुले जातः सनस्त्राता भवष्यति ॥
भूमिं यः प्रतिग्रहाति यश्च भूमि प्रयच्छति
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
तड़ागानाम् सहस्रेण वाजपेय शतेन च
गवाम् कोटि प्रदानेन भूमिहर्ता न शुध्यति ॥
हरते हारयते यस्तु मन्दबुद्धिस्तमोवृत.
स बद्धो वरुणैः पाशै तिर्यग्योनिं च गच्छति
स्वदत्ता परदत्ता वा यो हरेत वसुन्धराम्।
स विष्टाया क्रमिः भूत्वा पच्यते पितृभि' सह ॥
आदित्यो वरुणोविष्णुर्ब्रह्मा सोमो हुतासनः
शूलपाणिस्तु भगवान अभिनन्दन्ति भूमिदम् ॥

सामान्योऽय धर्म्मसेतुर्नृपाणाम्
काले काले पालनीयो भवद्भि
सर्वानेतान् भाविन भूपतीन्द्रान
भूयो भूयो याचते **रामचन्द्र** ॥
इति कमलदलाम्बुबिन्दुलोलाम
श्रियमनुचिन्त्य मनुष्यजीवितञ्च ।
सकलमिदमुदाहृतञ्च बुद्धा
नहि पुरुषै परकीर्त्तयो विलोप्या ॥

परमभट्टारक महाराजाधिराजपरमेश्वर**श्रीजनमेजयदेव**स्य विजयराज्य सवत्सरे
तृतीय श्रावण मास तिथौ पञ्चम्या यत्राङ्कतो सवत ३ श्रावण सुदि ५ ।
लिखितमिदं शासनम् महासन्धिविग्रह प्रतिबद्ध
कायस्थ कोइ घोषत वल्लोपसुतेन **सग्रामेन** ।
उत्कीर्णं शासनमिति रयण सौका सुतेन मङ्गल महाश्री ।

(From B C Mazumdar s *Sonepur Tract*

ययाति केसरी या महाशिवगुप्त ययातिराजदेव
का कटकस्थ ताम्रशासन ।

ओं । स्वस्तिप्रेमनिरुद्धमुग्धमनसो स्फारीभवद्वपुषो
यूनोर्यत्र विचित्रनिर्भररतक्रीडाश्रम तन्वतो ।
विच्छिन्नोऽपि कृतानिमात्रपुलकैरार्निर्भरत् मौनतः
रात्रे पल्लविनाङ्कमे स्मरस याम मुहुस्तायत ॥१॥
यत्रारम्भविशेषरूपमहिमाऽपास्ताप्सर कान्तिभि
जातन्या कलहस्यपि प्रणयिन पश्यान्यले स्नापिता ।
जायन्ते प्रतिशंकित स्मरशर प्रोत्थापितानान्तरैर्या
सान्द्रस्वेदजलावसेचनतरशान्तियातरामादरा ॥२॥
अत्युत्तुङ्गपुरन्दरेन्द्रदन्तमुसल प्रोद्भासिगोचिन्त्यय
ध्यान्तध्वसनिष्फलीकृतशरच्चन्द्रोदय सदा ।
यत्रासीत्मनीजास्य विशद सुधामय मण्डप
सन्तापदमल्पनीयधवल प्रासादवृन्दायत ॥३॥

श्रीमहाशिवगुप्तराजदेवपादानुध्यातपरममाहेश्वरपरमभट्टारक महाराजाधिराज-परमेश्वरसोमकुलतिलकत्रिकलिंगाधिपतिश्रीमहाभवगुप्तराजदेवः कुशली ॥

कोसलशाखगच्छन्हाविषयीय गोंडसिसिणिह्लि ग्रामे तद्विषयीय ब्राह्मणान् संपूज्य समाहर्तृ सन्नियुक्ताधिकारिकदाण्डपाशिकपिशुनवेत्रिकावरोधजनराणकराजपुत्र राजवल्लभादीन् सर्वान् समाज्ञापयति विदितमेतद् भवता यथास्माभिरयं ग्रामः सनिधि सोपनिधिः सर्वबाधाविवर्जितः सर्वोपरिकरादानसहितः चतुःसीमापर्यन्तः सगर्तोषरः सजलस्थलः श्रावस्ती मण्डले कासीलीभट्ट ग्राम विनिर्गताय कोसले देवीभोग विषयीय सींगोआ ग्राम वास्तव्याय कौशिकगोत्राय विश्वामित्रदेवरात औदल प्रवराय कौथुम चरणाय छान्दोग्य शाखाध्यायिने भट्टपरमेश्वरपौत्राय भट्टवसिष्ठसुताय राणक श्रीरक्षोनाम्ने सूर्यग्रहणे सलिलधारापुरःसरमाचन्द्रतारकार्कक्षितिसमकालोपभोगार्थं माता-पित्रोरात्मनश्च पुण्य यशोभिविवृद्धये ताम्रशासनेनाकरीकृत्य प्रतिपादित इत्यवगत्य समुचित करनिकरभागभोगादिकमुपनयद्भिः सुखेन प्रतिवस्तव्यमिति। भाविभिश्च भूपतिभिः दत्तिरियं अस्मदीय धर्मगौरवादस्मदनुरोधाच्च स्वदत्तिरिवानुपालनीया। तथा चोक्तं धर्मशास्त्रे—Here follow the usual imprecatory verses,

येनात्यन्तसुरासुराधिपगुरुः प्रज्ञाभिमानैर्जितो
राज्ञारोपितराज्यभारमतुलं यश्चावहल्लीलया।
यस्यासीन्नयविक्रमद्वयमपि प्रेयान् सखा सर्वदा
स श्रेयान् धृतसान्धिविग्रहपदः श्रीसिंहदत्तः कृती ॥

नाम्ना मंगलदत्तेन कायस्थेन स.. . .

परममाहेश्वरपरमभट्टारकमहाराजाधिराजपरमेश्वरसोमकुलतिलकत्रिकलिंगा-धिपति श्रीभीमरथ देवस्य प्रवर्द्धमानविजयराज्ये तृतीयसंवत्सरे मार्गशीर्षमासीय शुक्लपक्षे तिथौ तृतीयाया यत्राङ्केनापि संवत् ३ मार्ग सुदि ३ विज्ञातिमधुमल्लेन उत्कीर्णम् ॥*

* Epi Ind Vol III p 355

महाभवगुप्तजनमेजयराजदेवका सतल्लमाग्रामदानवाला ताम्रलेख

पद्मासीना गजलक्ष्मीमुद्रा (चक्राकार)

ॐ स्वस्त्यनकवरविलासिनीचरणनूपुररवोद्भ्रान्तमत्तपारावतकुलात् सकलदिगन्तरागतवन्दिजनविस्तारितकीर्ते श्रीमतो **मूरसीम्न** ।

अस्ति क्षोणीश्वराणाममलमणिरुचामन्वयान् कौस्तुभाभ
शौर्यत्यागाम्बुराशिर्विरचितविधिवद्दानशुभ्रोज्ज्वलाश्र ॥
श्रीमान् **जन्मेजयाख्य**स्त्रिदशपतिसम क्ष्मापतिर्भोक्तुकाम
प्रख्यातद्वैविरशब्दविदलनपटुर्भूपति सोमवशे ॥

सोऽय परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमहाशिवगुप्तराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरसोमकुलतिलकस्त्रिकलिङ्गाधिपतिश्री **महाभवगुप्तराजदेव**, कुशली ।

कशलोड़ाविषयप्रतिबद्ध**सतल्लमा**ग्रामे ब्राह्मणान सपूज्य तत्प्रतिनिवासि कुटुम्बिजनपदान तद्विषयीययथाकालाध्यासिन समाहर्तृ सन्निधातृचाटभटपिशुनवेत्रिकावरोधिराजवल्लभादीन सर्वान राजपादोपजीविन समाज्ञापयति। विदितमस्तु भवता यथास्माभिरय ग्राम सनिधि सोपनिधि सर्वबाधाविवर्जित सर्वापरिकरदानसहित साम्रमधूक सगर्त्तोषर प्रतिनिषिद्धचाटभटप्रवेश चतुःसीमाविच्छिन्न गौतमगोत्राय गौतमाङ्गिरसौतथ्यत्रयार्षेयप्रवराय वाजसनेयिमाध्यन्दिनशाखाध्यायिन **ओढ्र**देशे **पुरुषमण्डप**ग्रामविनिर्गताय **मुरुजुग**ग्रामवास्तव्याय भट्टपुत्र**श्रीसान्थकर**नाम्न **धृतिकर**सुताय सलिलधारा पुरस्सर आचन्द्रतारकार्कक्षितिसमकालोपभोगार्थं मातापित्रोरात्मनश्च पुण्ययशाभिवृद्धय ताम्रशासनेनाकरीकृत्य प्रतिपादित इत्यवगत्य समुचितभोगभागकरहिरण्यादिकमुपनयद्भिर्भवद्भि सुखेन प्रतिवस्तव्यमिति । भाविभिश्च भूपतिभिदत्तिरियमस्मदीयधर्मगौरवादस्मदनुरोधाच्च स्वदत्तिरिवानुपालनीया । तथाचोक्तं धर्मशास्त्रे ।

Verses quoted here are identical with verses on pp 28 29 with the exception of verse 8 which is omitted in this grant

परमभट्टारकमहाराजाधिराजपरमेश्वरसोमकुलतिलकत्रिकलिङ्गाधिपति श्रीजनमेजय देवस्य विजयराज्ये संवत्सरे अष्टमे कार्तिकमास द्वितीयपक्षे तिथौ द्वादश्यां यत्राङ्कतोऽपि संवत ८ कार्तिक शुद्ध १२। दूतकश्च महामहत्तमः भट्टश्रीसाधारणः शोभनसुतः। लिखितमिदं शासनं महासान्धिविग्रहिक राणकश्रीमल्लदत्तधारदत्तसुतप्रतिबद्धेन कायस्थ-आल्वेन कैलाससुतेन। उत्कीर्णं सम्रामेन रयणाओकासुतेन।

विनीतपुरके महाशिवगुप्त ययातिराजदेवका ताम्र-शासन

ओं स्वस्ति श्रीमतो **विनीतपुरात्।** परमभट्टारकमहाराजधिराजपरमेश्वर महाभवगुप्तराजदेवपादानुध्यातपरममाहेश्वरपरमभट्टारकमहाराजधिराजपरमेश्वर सोमकुल-तिलकः त्रिकलिङ्गाधिपति**श्रीमहाशिवगुप्तराजदेवः** कुशली। **कोशल-**देशप्रतिबद्ध- **"गमुटपाट"** चोत्तरपट्टीय **"निविण्डा"** ग्रामे ब्राह्मणान् संपूज्य तद्विषयीयान् यथाकालाध्यासिनः समाहर्तृ सन्निधातृयुक्ताधिकारिकदण्डपाशिकचाटभट-पिशुनवेत्रिकावरोधजनराणकराजपुत्रराजोराजवल्लभादीन् सर्वान् राजपादोपजीविनः-समाज्ञापयति। विदितमस्तु भवताम् यथाऽस्माभिरयं ग्रामः सनिधिः सोपनिधिः सदशापराधः सर्वबाधाविवर्जितः सर्वोपरिकरादानसहितचतुःसीमापर्यन्तः साम्रमधूकः सगर्त्तोषरः सजलस्थलः प्रतिनिषिद्धचाटभटप्रवेशो भारद्वाजसगोत्राय आंगिरसबार्हस्पत्य भारद्वाजप्रवराय **हुलास**शर्मणः पौत्राय **नारायण**शर्मणः पुत्राय **भटपरोली** विनिर्गताय **कोशलीय**मरमेण्डाग्रामवास्तव्याय श्री**पुण्डरीक**शर्मणे दीक्षिताय **गमुटपाट**मण्डले उत्तर-पट्टिकाया **निविन्ना**ग्राम. सलिलधारापुरस्सरमाचन्द्र-तारकार्कस्थितिसमकालोपभोगार्थं मातापित्रोरात्मनश्च पुण्ययशोवृद्धये ताम्रशासनेनाकरी-कृत्य प्रतिपादित इति अवगम्य समुचितभोगभागकरहिरण्यादिप्रत्यायनमुपनयद्भिर्भवद्भिः सुखेन प्रतिवस्तव्यमिति। भाविभिश्च भूपतिभिर्दत्तिरियमस्मदीयधर्मगौरवादस्मदनु-रोधाच्च स्वदत्तिरिवानुपालनीया।

Verses quoted are identical with those given on pp 28-29, with one additional verse which is numbered nine in the present record and runs as follows —

सुवर्णमेकं गामेकां भूमेरप्यर्धमङ्गुलम् ।
हरन्नरकमायाति यावदाभूतसम्प्लवम् ॥

परममाहेश्वरपरमभट्टारकमहाराजाधिराजपरमेश्वरसोमकुलतिलक त्रिकलिङ्गाधिपतिश्रीमत्**ययाति**राजदेवस्य प्रवर्धमानविजयराज्ये पञ्चदशसंवत्सरे मार्गशीर्षमासे शुक्लपक्षे त्रयोदश्यां तिथौ संवत् १५ मार्गसुदि १३ लिखितमिदम् शासनं महासान्धिविग्रहिकराणक**श्रीचारुदत्त**स्याज्ञया महाक्षपटलिक **श्रीउद्धव**नागेनाश्विनागसुतेनोत्कीर्णं ठक्कुरपनागतेनेति । सम्पद्नो जलजपर्णजलाभा जीवितं मरणं सन्ततिसम्भ्रमम् भोगभुक्तिरचिराय विलोक्य कीर्तयो नृपतिभिर्नविलोप्या इति ॥

कोदोपाली (सम्बलपुर) में प्राप्त राणक श्रीपुञ्ज(वोडसुत.) का ताम्र पत्र*

ओं स्वस्ति । **श्रीययातिनगरे** परममाहेश्वरपरमभट्टारकमहाराजाधिराज परमेश्वरसोमकुलतिलक त्रिकलिङ्गाधिपति **श्रीमहाशिवगुप्तराजदेव**पादानुध्यात परममाहेश्वरपरमभट्टारकमहाराजाधिराजपरमेश्वरसोमकुलतिलक त्रिकलिङ्गाधिपति **श्रीमहाभवगुप्तराजदेव**महीप्रवर्द्धमानकल्याणविजयराज्ये त्रयोदशसंवत्सर अङ्काद्य संवत् १३ । **वामण्डा**पाटीसमावासितः परममाहेश्वरमण्डलवंशोद्भवः [illegible] [illegible] प्रसादप्रवर्धमानपञ्चाधिपति समधिगत पञ्चमहाशब्दमाण्डलिकराणक **श्रीपुञ्ज** (वोडसुत) कुशली ।

---

* ([illegible])—[illegible] (valer [illegible]) [illegible] Characters

पटना (बलॉंगीर) में प्राप्त महाशिवगुप्त ययाति-राजदेवका ताम्र-लेख

श्रीमान् महाराजा साहब पटना स्टेट (बलांगीर) के अधिकारमें

ॐ स्वस्ति प्रेमनिरुद्धमुग्धमनसाः स्फारीभवच्चक्षुपाः (प्रथम सात श्लोक as given on pages 29 & 30)

माद्यद्भेलालिमालाकुलकरटपुटस्यन्दिदानप्रवाहान

सिन्दूरारक्तकुम्भान सितपृथुलरदान् कामदेवादि संज्ञान ।

जित्वा जापालमाजौ जनितसुरवधूविस्मयस्मेरवक्त्रः

स द्वा त्रिंशत् करीन्द्रान शरनिकरहतारोहकानग्रहीद्यः ॥८॥

परममाहेश्वर परमभट्टारकमहाराजाधिराजसोमकुलतिलकः त्रिकलिङ्गाधिपति श्रीमहाभवगुप्तराजदेवपादानुध्यातः परममाहेश्वरपरमभट्टारकमहाराजाधिराजपरमेश्वर सोमकुलतिलकः त्रिकलिङ्गाधिपति **श्रीमहाशिवगुप्तराजदेवः** कुशली ॥

षण्णवत्यां तेलातट्ट⊛ विपयीय **ल्लुत्तरुमा** ग्रामे तद्विपयीय व्राह्मणानापूज्य तद्विपयीय यथाकालाध्यासिनः समाहर्तृ सन्निधातृनियुक्ताधिकारिकदण्ड-पाशिकभट्टपिशुनवेत्रिकावरोधनजनराज्ञीराजपुत्रराणकराजवल्लभादीन सर्वान राजपादोप-जीविनः समाज्ञापयति विदितमस्तु भवतां यथास्माभिरयं ग्रामः सनिधिस्सोपनिधिः सर्ववाधाविवर्जितः सर्वोपरिकरादानसहितः चतुसीमापर्यन्तः साम्रमधुकः सगर्त्तोपरः सजलस्थलः प्रतिनिपिद्धचट्टभट्टप्रवेशः कौशिकगोत्रायदेवरात औदकविश्वामित्रप्रवराय गौतमशाखाध्यायिने **श्रावस्तिमण्डले** कासिली विनिर्गताय × × × × **अन्तरडी** वास्तव्याय परमेश्वर नप्त्रे, सिद्धेश्वरसुताय **भट्टश्रीमहोदधये** उदकधारापुरःसरम् आचन्द्रतारकार्कं क्षितिसमकालोपभोगार्थं मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये ताम्रशासनेनाकरीकृत्य प्रतिपादितः etc etc,

Here follow the usual imprecatory verses The last sloka refers to सिंहदत्तः the minister of peace and war for कोसल, called कोसलीय सन्धिविग्रहीक। It ends with the following lines त्रिकलिङ्गाधिपति श्रीमद्य-यातिदेवस्यप्रवर्द्धमानविजयराज्येऽष्टाविंशतिमे संवत्सरे भाद्रपदमासे सितपक्षे तिथौ पञ्चभ्या यत्राङ्केपि संवत २८ भाद्रपद सुदि ५ शिवम् ॥

charter written by कायस्थ सूर्यसेन।

charter engraved by मधुमल्लेन।

⊛ तेलातट्टविषय was in Kosala c f कोसलदेशे तेलातटविषये ढेलाढेलीग्रामे Charter No I J A S B (1905)

शरभपुर-राजधानीवाले नरेश ।

— ० —

लिपि—सम्पुटशिरा (box headed script)

मुद्रा—चक्राकार खड़ी हुई (standing) गजलक्ष्मी

शरभपुर के महासुदेवराजका ताम्रशासन
खरियार (जिला—रायपुर) में प्राप्त

स्वस्ति । **शरभपुरात्** । विक्रमोपनतसामन्तमकुटचूडामणिप्रभाप्रसेकाम्बुधौतपाद-युगलो रिपुविलासिनीसीमन्तोद्धरणहेतुर्वसुवसुधागोप्रद परमभागवतो मातापितृ-पादानुध्यात **श्रीमहासुदेवराज** । **क्षितिमण्डाहारीयनवन्नक** एतत्प्रावेश्य**शाम्बिलक**यो प्रतिवासिकुटुम्बिनस्समाज्ञापयति विदितमस्तु वो यथा स्माभिरेतद्ग्रामद्वय त्रिदशपतिसदनसुखप्रतिष्ठाकरं यावद्रविशशिताराकिरणप्रतिहत-घोरान्धकार जगदवतिष्ठते तावदुपभोग्यस्सनिधिस्सोपनिधिरचाटभटप्रावेश्यस् सर्वकरवि सर्जितो मातापित्रोरात्मनश्च पुण्याभिवृद्धये वाजसनेयकौशिकसगोत्र**विष्णु**स्वामिन स्ताम्रशासनेनातिसृष्ट । त यूयमस्युपलभ्याज्ञाश्रवणविधेया भूत्वा यथोचित भोगभागमुपनयन्तस्सुख प्रतिवत्स्यथ । भविष्यतश्च भूमिपालाननुदर्शयति ।

The verses quoted are identical with those on p 40

इति स्वमुखाज्ञया । सवत्सर ७ श्रावण दि २०+६ उत्कीर्णं ताम्रशासन द्रोणसिंहे न ॥

प्रसन्नार्णवसंभूतमानमात्रेन्दुजन्मन ।
श्रीमत्सुदेवराजस्य स्थिर जगति शासनम् ॥

आरङ्ग (जिला—रायपुर) में प्राप्त महासुदेव का ताम्र-लेख

(आरङ्गके भागीरथी सोनकर के अधिकार म)
१६२६ मे प्राप्त ।

ॐ स्वस्ति **शरभपुरात्** विक्रमोपनतसामन्तमकुटचूडामणिप्रभाप्र
सेकाम्बुधौतपादयुगलो रिपुविलासिनीसीमन्तोद्धरणहेतु-

र्व्वसुवसुधागोप्रदः परमभागवतो मातापितृपादानुध्यातः

श्रीमहासुदेवराजः तोसड्डुसुन्कीयशिविलिङ्गके प्रतिवासि

कुटुम्बिनस्समाज्ञापयति विदितमस्तु वो यथायं ग्राम-

PLATE II (1st side)

स्त्रिदशपतिसदनसुखप्रतिष्ठा (क) रो यावद्रविशशितारा किरणप्रति-

हतघोरान्धकारं जगदवतिष्टते तावदुपभोग्यस्सनिधिसोपनिधि-

रचाटभटप्रावेश्यस्सर्व्वकरविसर्जितः प्रतिहारभोगिल्लेन माता-

पित्रोरात्मनश्च पुण्याभिवृद्धये कात्यायनसगोत्रमाध्यन्दिनवाज-

सनेय यज्ञस्वामिने अध्यर्द्धांशेन भारद्वाज कुमार वत्सआत्रे-

PLATE II (2nd side)

यकाण्ववाजसनेययज्ञस्वामिनो प्रत्यंशेन कात्यायनविशाख

स्वामिकौशिकमध्यन्दिनगोलस्वामि एवं दामोदरस्वामि-

दासस्वामिभारद्वाजपश्चालिस्वामिदीक्षितायनीकान् प्रत्यर्धांशे-

न ताम्र-शासनेनातिसृष्टोभूत्वाऽस्माभिरनुमोदितः। ते यूयमेवमुपलभ्यैषा-

माज्ञाश्रवणविधेया भूत्वा यथोचितं भोगभागमुपनयन्तस्सुखं

प्रतिवत्स्यथ। भविष्यतश्च भूमिपाननुदर्शयति

PLATE III

The verses are identical with those given on page 40

रवमुखाज्ञया संवत् ७ वैशाख दि २०-९

उत्कीर्णं द्रोणसिङ्घेन।

The seal is circular and forms a part of the charter Its legend is partly damaged

रायपुर से प्राप्त महासुदेवराजका ताम्रशासन

ॐ स्वस्ति। शरभपुरात्। विक्रमोपनतसामन्तमकुटचूडामणिप्रभाप्रसेकाम्बुधौत-पादयुगलो रिपुविलासिनीसीमन्तोद्धरणहेतुर्व्वसुवसुधागोप्रदः परमभागवतो मातापितृ-पादानुध्यात श्रीमहासुदेवराजः। पूर्वराष्ट्रियश्रीसाहिकायाम् प्रति-

वामि कुटुम्बिनस्समानापयति विदितमस्तु वो यथास्माभिरयम् ग्रामस्त्रिदशपतिसदनसुख प्रतिष्ठाकरो यावद्रविशशिताराकिरणप्रतिहतघोरान्धकारं जगदवतिष्ठते तावदुपभोग्य स्सनिधिस्सोपनिधिरचाटभटप्रावश्य मचकरविसर्जित कौण्डिन्यसगोत्रवाजसनय **सवितृस्वामिना** आत्मीय कन्याप्रदाने औपमन्यव सगोत्र जामात्रो **नागवत्स स्वामिबन्धुवत्सस्वामि**नोस्ताम्रशासनेनातिसृष्टको भूत्वास्माभिरप्युत्तरायणे माता पित्रोरात्मनश्च पुण्याभिवृद्धयेऽनुमोदित ॥ ते यूयमेवमुपलभ्यैपामाज्ञाश्रवणविधेया भूत्वा यथोचितम् भोगभागमुपनयन्त सुख प्रतिवत्स्यथ। भविष्यतश्च भूमिपाननुदर्शयति

दानात् विशिष्टमनुपालनज पुराणा
धर्मेषु निश्चितधिय प्रवदन्ति धर्मम् ॥
तस्माद् द्विजाय सुविशुद्धकुलश्रुताय
दत्ता भुव भवतु वो मतिरेव गोप्तुम् ॥

तद् भवद्भिरप्येषा दत्तिरनुपालयितव्या। व्यासगीताश्चात्र श्लोकानुदाहरन्ति —

अग्नेरपत्य प्रथम सुवर्ण
भूर्वैष्णवी सूर्यसुताश्च गाव ।
दत्तास्त्रयस्तेन भवन्ति लोका
य काञ्चन गा च महीञ्च दद्यात् ॥
षष्टि वर्षसहस्राणि स्वर्गे मोदति भूमिद ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
बहुभिर्वसुधा दत्ता राजभि सगरादिभि
यस्य यस्य यदाभूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥

अस्मिन्नेव ग्राम पूर्वतटाकस्य पर्यन्तभूमिरवनद्धा नीवापिका पन्थानम् यावज्ज्यष्ट इति कृत्वा **नागवत्सस्वामिने** ग्रामाधस्थायिका दत्ता

स्वमुखाज्ञया प्रवर्द्धमानविजयसंवत्सर १०, माघ ६ उत्कीर्ण द्रोणसिंहेन —

"**प्रसन्न**तनयस्येन विक्रमाक्रान्तविद्विष ।
श्रीमहाजयराजस्य शासन रिपुशासनम् ॥"

This seal is apparently of Mahājayarāja The plates bear the name of his nephew Mahāsudevarāja

सारंगढ़ में प्राप्त शरभपुरके महासुदेवराजका ताम्रशासन

(सारंगढ़के राजासाहिबके अधिकार में है)

ॐ स्वस्ति। **शरभपुरा**द्विक्रमोपनतसामन्तमकुटचूडामणिप्रभाप्रसेकाम्बु-धौतपादयुगलो रिपुविलासिनीसीमन्तोद्धरणहेतुर्वसुवसुधागोप्रदः परमभागवतो मातापितृ-पादानुध्यातश्री**महासुदेवराजः**। **तुण्डारक**भुक्तीय **चुल्लान्दरका** प्रतिवासिकुटुम्बिनस्समाज्ञापयति। विदितमस्तु वो यथायं ग्राम स्त्रिदशपतिसदनसुख-प्रतिष्ठाकरो यावद्रविशशितारा किरणप्रतिहतमहान्धकारं जगदवतिष्ठते तावदुपभोग्य-स्सनिधिरसोपनिधिरचाटभटप्रवेश्यः सर्व्वकरविसर्ज्जितः राज्यमहादेवीराजकुलं मातापित्रोरात्मनश्च पुण्याभिवृद्धये उदकपूर्व्वं कौशिकसगोत्रत्रिमहत्त्व**विद्याभास्कर स्वामि, प्रभाकरस्वामि, बर्व्वरीस्वामि, बोटस्वामि, दत्तस्वामि-विष्णुस्वामि, फल्गुस्वामि, स्वामीकीर्तिस्वामि शङ्करस्वामिनां** ताम्रशासनेनातिसृष्टो भूत्वाऽस्माभिरनुमोदितः। ते यूयमेवमुपलभ्यैषामाज्ञाश्रवणविधेया भूत्वा यथोचितं भोगभागमुपनयन्तस्सुखं प्रतिवत्स्यथ। भविष्यतश्च भूमि-पाननुदर्शयति।

The following lines tally with those on other records of the same king The last or the third plate and the seal of this record are missing.

श्रीपुर (जिला—रायपुर) में प्राप्त महासुदेव का ताम्र-लेख

(श्रीपुरके ताळुकदार श्रीरामरतनलालके अधिकारमें है)

१९२९ में प्राप्त।

PLATE I (Broken)

महासुदेव

ॐ स्वस्ति **शरभपुरा**द्विक्रमोपनतसामन्तमकु (ट) × × ×

प्रभाप्रसेकाम्बुधौतपादयुगलो रिपुविलासिनी × × × ×

हेतुर्वसुवसुधागोप्रद. परमभाग(वत) × × × × ×

नुध्यात **श्रीमहासुदेवराज.** मयत्र × × × × × × ×
वके प्रतिनासि कुटुम्बिनस्समाना(पयति)× × × ×
यथास्माभिरय ग्रामस्त्रिदशपतिसुन × × ×

PLATE II (1st side)

यानद्रविशशितारा्किरणप्रनिहतघोरान्धकार जगदनतिष्ठ
त तानदुपभोग्यस्सनिधिस्सोपनिधिरचाटभटप्रानश्यम्मर्त्वक
रनिसर्ज्जित **पूर्वनन्न**पादम्नैत्तिरीय पाराशरसगोत्रब्राह्मण
कारणिककन्वीपस्वामिन दत्त इदानीमप्यस्माभिरपि
महादेवीराजकुलानिज्ञाप्य ताम्रशासनीकृत । त यूयमे
वमुपलभ्यास्याज्ञा श्रवणविधेया भूत्वा यथोचित भगिभाग

PLATE II (2nd side)

मुपनयन्तस्सुख प्रतिवत्स्यथ । भविष्यतश्चभूमिपालानु
दर्शयति ।

The verses are identical with those given on page 41

On the back of PLATE III

(उत्कीर्णं द्रोणसिंहेन)

Seal in good preservation

(Gaja Lakshmi)

प्रसन्नतनयस्येद विक्रमाक्रान्तविद्विष
श्रीमतो **जयराज**स्य शासन रिपु-शासन ॥*

* श्रीपुरयात्रा में हमे अप्रेल १९२६ में भागीरथी सोनकरवाला तथा यह-तीनो ताम्रशासन प्राप्त हुए। उनमें से इस ताम्रशासन की मुद्रापर ऊपरका लिखा हुआ श्लोक स्पष्ट अक्षरोंमें पाया जाताहै।

आरङ्ग (जि: रायपुर) मे प्राप्त महाजयराजका ताम्रशासन

स्वस्ति। **शरभपुरात्** । विक्रमोपनतसामन्तमकुटचूडामणिप्रभाप्रसेकाम्बुधौतपादयुगलो रिपुविलासिनीसीमन्तोद्धरणहेतुर्वसुवसुधागोप्रदः परमभागवतो मातापितृपादानुध्यातः श्रीमहा**जयराजः** । **पूर्व्वराष्ट्रियपम्बां**प्रतिवासिकुटुम्बिनः समाज्ञापयति । विदितमस्तु वो यथास्माभिरयं ग्रामस्त्रिदशपतिसदनसुखप्रतिष्ठाकरो यावद्रविशशिताराकिरणप्रतिहतघोरान्धकारं जगदवोतष्ठते तावदुपभोग्यः सनिधिसूसपिनिधिरचाटभटप्रावेश्यः सर्व्वकरविसर्ज्जितः वाजसनेयकौण्डिन्यसगोत्र**ब्रह्मदेव** स्वामिने मातापित्रोरात्मनश्च पुण्याभिवृद्धये उदकपूर्व्वं ताम्रशासनेनातिसृष्टः ॥

ते यूयमेवमुपलभ्यास्याज्ञाश्रवणविधेया भूत्वा यथोचितं भोगभागमुपनयन्त सुखं प्रतिवत्स्यथ । भविष्यतश्च भूमिपाननुदर्शयति ।

The verses are identical with those given on page 41

इति । स्वमुखाज्ञया उत्कीर्णं अचलसिंहेन प्रवर्द्धमान विजय संवत्सर ५ मार्गशिर

२०+५

मुद्रा श्लोक

प्रसन्नतनयस्यैव विक्रमाक्रान्तविद्विप ।

श्रीमतो **जयराज**स्य शासनं रिपुशासनम् ॥

ठकुरदिया (सारंगढ़ राज्य) में प्राप्त महाप्रवरराजका ताम्र-लेख

(सारंगढ़के राजासाहिबके अधिकारमे है)

१९३२में प्राप्त

PLATE I, 2nd side

ॐ स्वस्ति **श्रीपुरा**द्विक्रमोपनतसामन्तमकुटचूडामणिप्रभाप्र-

सेकाम्बुधौतपादयुगलो रिपुविलासिनीसीमन्तोद्धरणहेतु-

र्वसुवसुधागोप्रदः परमभागवतो मातापितृपादानुध्यात

श्रीमहाप्रवरराज तुण्डराष्ट्रियापाढके प्रतिवासिन समाज्ञा
पयति विदितमस्तु वो यथास्माभिरय ग्राम त्रिदशपतिसदन
सुखप्रतिष्ठाकरो यावद्रविशशितारकिरणप्रतिहतघोरान्ध

PLATE II 1st side

कार जगदवतिष्ठते तावदुपभोग्य सनिधि सोपनिधिरचाटभटप्रावे
श्य सतस्करनिर्मर्जित मातापित्रोरात्मनश्च पुण्याभिवृद्धये पराश
रसगोत्राय वाजसनेयिने भट्टकपुरन्दरस्वामिने ताम्रशा

सनेनातिसृष्ट । त यूयमस्युपलभ्यास्याज्ञाश्रवणविधेया
भूत्वा यथोचित भोगभागमुपनयन्त सुख प्रतिवसथ । भविष्यतश्च भू
मिपालाननुदर्शयति दानाद्विशिष्टमनुपालनजं पुराणा

PLATE II 2nd side

धर्मेषु निश्चितधिय प्रवदन्ति धर्मं । तस्माद्द्विजाय सुविशुद्धकुल-
श्रुताय दत्ता भुव भवतु वो मतिरेव गोप्तु ॥ तद् भवद्भिरप्येपादत्ति
रनुपालयितव्या । व्यासगीतान् श्लोकानुदाहरन्ति । अग्नरपत्य प्र-
थम सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गाव । दत्तास्त्रयस्त
न भवन्ति लोका । य काचन गा च महीं च दद्यात् ॥ षष्टिं वर्ष स
हस्राणि स्वर्गे मोदति भूमिद । आच्छेत्ता चानुमन्ता च तान्येव नर

PLATE III 1st side

क वसेत । बहुभिर्वसुधादत्ता राजभि सगरादिभि ।
यस्य यस्य यदा भूमिस्तस्यतस्यतदा फल । स्वदत्ता परदत्ता वा
यत्नाद्रक्ष युधिष्ठिर । महीं महीमता श्रेष्ठ दानाच्छ्रेयोनुपाल
नमिति । स्वमुखाज्ञया प्रवर्द्धमानविजयसवत्सर ३ मार्ग-
शीष दि २ । उत्कीर्णं शीलसिङ्घेण ।

Seal (in good preservation)

मानमात्र-सुतस्येद स्वभुजोपार्जितक्षित ।

श्रीमत**प्रवरराज**स्यशासन शत्रुशासन ॥

हैहय अथवा चेदि-कलचुरि वंश ।

लिपि—नागरी ।

मुद्रा चक्राकार—बैठीहुई (Seated) गजलक्ष्मी ।

अमोदा (जिला-विलासपुर) में प्राप्त पृथ्वीदेव (प्रथम) का ताम्र-लेख।

चेदि संवत ८३१=सन ई १०७९।

ॐ नमो ब्रह्मणे।

निर्गुणं व्यापक नित्य शिवपरमकारणम्।
भावग्राह्य पर ज्योतिस्तस्मै सद्ब्रह्मणे नम ॥१॥
यदतदग्रे सरमम्बरस्य ज्योति स पूषा पुरुष पुराण।
अथास्यपुत्रो मनुरादिराज तदन्वयभूद्भुवि कार्तवीर्य ॥२॥
देव **श्रीकार्त्तवीर्य** क्षितिपतिरभवत् भूषण भूतधात्र्या
हलोल्लिखाद्रिबिम्ब्यसुहिनगिरिसुताश्लेषमन्नोपिनशम्।
दोर्दण्डाकाण्डसेतुप्रतिगमितमहामारिराजप्रवाह
व्याधूतत्र्यक्षपूजागुरुजनितरुष रावण यो बबन्ध ॥३॥
तद्वशप्रभवा भूपा बभूवुर्भुवि **हैहया**।
तेषावंशे च चेद्यादिनितीश **कोक्कलो**ऽभवत् ॥४॥
कर्णाटवङ्गपतिगुर्जरकोङ्कणेश शाकम्भरीपति तुरुस्क रघूद्भवानाम्।
आदाय कोश हरिदन्ति चय हठन स्तम्भो जयस्य निहितो भुवि येन राज्ञा ॥५॥
अष्टादशारिकरिकुम्भविभङ्गसिंहा पुत्राबभूवुरतिशौर्यपराश्च तस्य।
तत्राग्रजो नृपवरस्त्रिपुरीश आसीत् शेषाश्च मण्डलपतीन्स चकार बन्धून् ॥६॥
तेषामनुजस्य **कलिङ्गराज** प्रतापवह्निस्थपिनारिराज।
जातोन्वये द्विप्तरिपुप्रवीर प्रियाननाम्भोरुहपात्रवणन्दु ॥७॥
तस्मादपि प्रततनिमल कीर्तिकान्तो जात सुत **कमलराज** इति प्रसिद्ध।
यस्य प्रतापतरणावुदित रजन्या जातानि पङ्कजवनानि विकासभाञ्जि ॥८॥
क्षीणोऽमुत्कलनृप परिमथ्यधीरो **गाङ्गेय** देव विभव शमदाच्छिद्य य।
उच्चैस्थिरप्रणवरन्तृपरत्नदान मन्नोपितासुरसुर स हि मन्दराभ ॥९॥
महीभर्तृ विभुपार्थ पयोधिरिव कौस्तुभ।
जितशूरप्रताप हि **रत्नराज**मसूत स ॥१०॥
दृप्तविद्विष्ट सामन्त-ध्वान्तध्वसनभास्करं।
यस्य प्रतापनस्यैव शैत्यायाधिगिना द्विप ॥११॥

नोन्नलाख्या प्रिया तस्य शूरस्येव हि शूरता ।
कोसो मण्डलनाथस्य सुता या **यजुवर्मण:** ॥१२॥

ततः **पृथ्वीदेव:** सकलधरणी भूषणमणिः समुत्पन्नः श्रीमद्बुधजनमनोम्भोजतरणिः ।
प्रतापाग्नी यस्य ज्वलति सततोत्तमहृदये विलीनं सामात्यैर्जड़कृतशरीरैरविपरैः ॥१३॥
यस्मिन्महीमवति नीति विचार सारे वातोप्यतत्‌र्मनि पदं न करोति कोन्यः ।
धर्मव्यनिस्थितमतो च नदैवलोपि लोकेपु नूनमुपघातलवोदयोस्ति ॥१४॥

अनेन समस्त प्रतिपत्तिसमूह समुपेतमर्वालङ्कार विभूपितेन शंखयुग्मध्वनिपूरित जग ज्जयेश्वर रवत्रासितारातिचक्रेण समधिगत पञ्चमहाशब्देन श्रीमद्वङ्केश्वरवरलब्ध प्रसादैक विंशति सहस्रैकनाथमहाप्रचण्ड **सकलकोसलाधिपतिना** परममाहेश्वरेण कलचुरि वंशोद्भवेनेत्यादि समस्त राज्ञावली विराजमान महामण्डलेश्वरेण हाग्नियामठ निर्गताय आङ्गिरस गोत्राय उचथ्य गौतम वशिष्ठेति त्रिप्रवराय बह्वृच शाखिने यशोदेव प्रणव उपाध्याय थिराडच नप्त्रे चाहुसुताय श्रपकेशिवाय फाल्गुन कृष्ण सप्तम्यां रविदिने तुमाणके देव श्रीवङ्केश्वर चतुस्किका प्रतिष्ठायां श्रीमद्वङ्केश्वर पट्टाधिलग्न द्वौ पादौ प्रक्षाल्य कुशाक्षतहिरण्यसमन्वित वारितुण्डमात्र **ययपर** मण्डले **वसहा** ग्रामश्चतुः सीमा विशुद्धो मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये हस्तोदक शासनतया प्रदत्तस्तदय चन्द्र-दिवाकरक्षितिपाथोधिपवनाम्बराणि यावत् अविच्छिन्नसुत्तयाभागकर × × × × पुत्रपौत्रा-दिभिश्च भोक्तव्यः ॥

× × × × × ×

Here occur some 7 (seven) Slokas

गर्गेश्वर: सुकवि**रल्हण** ईशभक्तस्ताम्रे चकार रचना, लिखितं सुधाक्षिः ।
योद्धाशलः सकलशिल्पनिधिः सुबुद्धिरुत्कीर्णवान्स शुभपङ्क्तिसदक्षरं च ॥२२॥

चेदीशस्य सं ८३१ ।

---

* This inscription has been reproduced almost in full, the others of the Haihaya period, are given in extracts only with a view to introduce the poetical compositions of the poets whose names find a mention in my verse called प्रशस्तिकृतः कवयः printed elsewhere in this volume.

My esteemed friend Prof V V Mirāshī M A is dealing with the inscriptions of the Kalachuri, Chedi or Haihaya Princes of Tripuri (Chedi) and Ratanpur (Mahākōsala) with fuller descriptions and critical notes

L.P.P.

शवरीनारायण के श्रीयुत प० रामचन्द्र भोगहा-वाले ताम्र-लेख से।

चेदि सवत् ८७८ *

ॐ नमो ब्रह्मणे।

× × × ×

य क्रीडया स्वभुजसेतुनिरुद्धरवा—
वारिप्रवाहितहरार्चनरूढरोषम्।
कैलासतोलनभयार्त्तभवानिगात्र—
श्लेषे पतोपितशिरं मितवान दशास्यम् ॥३॥

× × × ×

त्रिपुरीशानुजस्यासीद्वक्रीतुमाणभृभुज।
कलिंगराजस्तत्सुनुराशीत्**कमलराड्**नृप ॥६॥

× × × ×

अनर्घवल्ली विषये **तिणेरी**
ग्राम सदा रक्षितपृणपाणि।
सोमग्रहे पर्व्वणि **रत्नदेव.**
तोयेन नारायण शर्म्मणेऽदात् ॥१३॥

× × × ×

---

* This is given in decimal figures while in the Sirkhon plates a fine verse describes the date which is 880 *Chedi era*. The seal found with this record contains the donor's name in two lines as महाराजक श्रीमद्रत्नदेव without the Gajalakshmi device which one finds inscribed on the seal of Amoda Plates of Prithvideva II (Chedi era 900). The seal of Amoda Plates of Prithvideva I is missing and we are therefore in the dark about its device and legend.

सरखों (जॉजगीर) में प्राप्त रत्नदेव (द्वितीय) का ताम्र-लेख ‡

चेदि सं ८८०

The 1st three slokas are identical with those of Amōdā Plates dated chedi era 831

तद्वंश प्रभवा नरेन्द्रपतयः ख्याता क्षितौ हैहया.
तेषामन्वयभूषणं रिपुमनो विन्यस्ततापानलः।
धर्म्मध्यानधनानुसंचितयशाः शश्वत्सतां सौख्यकृत्
प्रेयान्सर्व्वगुणान्वितः समभवत् श्रीमानसौ **कोक्कलः** ॥४॥

Kokkala' son Kalingarāja, whose son was Kamalarāja.
Ref. 7th and 8th Slokas of Amōda Plates

तेनाथ चन्द्रवदनोजनि **रत्नराजो**
विश्वोपकारकरुणार्जितपुण्यभारः।
येनस्ववाहुयुगनिर्मितविक्रमेण
नीतं यशस्त्रिभुवने विनिहत्य शत्रून् ॥८॥

नोनल्लाख्या प्रिया तस्य शूरस्येव हि शूरता
तयोः सुतो नृपश्रेष्ठः **पृथ्वीदेवो** वभूव ह ॥९॥

× × × ×

इलावर्त्तादि वर्षाणां मध्ये**भारत**मुत्तमम्।
मध्यदेशस्तु तत्रापि **सोणभद्रो**स्ति यत्र सः ॥१२॥

× × × ×

इन्दोर्म्मुक्तिं कुर्वतायं तदानीं
सर्व्वादायैर्म्मण्डलेनर्घवल्याम्।
राज्ञा तुष्टेनाथ **चिंचातलाई**
ग्रामस्तस्मै शासनीकृत्य दत्तः ॥२०॥

× × × ×

तस्यामेवा**नर्घवल्यां** श्रीम**त्कीर्तिधरः** सुधीः।
जंडेर ग्रामनाथोयं लिलेखाक्षरशोभनम् ॥३५॥

---

‡ The donor, Ratnadeva II is described in verse 11 as सकलकोसल मंडनश्रीः। Ref page 54

अकलतरा (जिला विलासपुर) मे प्राप्त रत्नदेव (द्वितीय) के सेनापति वल्लभराजका शिला-लेख

(Un dated)

श्रीरत्नदेव इति वीरनरेन्द्रगर्व—
सर्वंकष समरपण्डितपुण्डरीक ।
आसीदसीमभुजपौरुष सम्भृतार्थ
दानैस्नानहृदयस्तनयस्तदीय ॥६॥

Ratnadeva II had a general named वल्लभराज who conquered the लडहा country and subdued the king of गौड in Bengal

महाशक्तवाधारी विविधपरिपन्थि प्रतिहृति—
प्रवीण प्रोद्दामप्रसरशिखिनिक्रान्त **लडहा** ।
× × × विख्यातमहिमा
मनामित्थ योऽसौ जनयति कुमार भ्रममिह ॥१५॥
य कृत्वा करिवन्यकौतुकरस श्रद्धाकुर्व्वीतले
निर्मातद्रुमखण्डविन्ध्यविपिन पत्यापति दन्तिनाम्।
गौडेन्द्र मवरत्सदर्थमपृथू कुर्वन्नपि प्रत्यह
वीरोवैरिपुर व्यपत्त करिणा वन्याय विन्ध्यस्थलीम् ॥१७॥
तनेऽम्माभरणमारचित पृथिव्या
पृथ्वीपतन्निजपतम्महिषीतिमत्त्वा ।
रवन्त मन्दिरमिपान्नयनोपभोग्य
भक्तोपचार चतुरण यशोधनेन ॥२१॥
दधदनिलक्षणभङ्ग हतमामान्य प्रमाणरमणीयम् ।
सौगलमतमिवलोके **'वल्लभसागर'**-शरोभाति ॥२४॥
धीमानिमां कमलिनीमिव **देवपाणि**
सङ्गन्न भोग्यसुभगा विबुधैस्स्याम् ।
वर्णात्तमा कविकुदम्बमन प्रमोद—
विस्तारिणीं रसमयीमकरोत्प्रशस्तिम्* ॥२६॥

---

* Text not yet published Ref C P Inscriptions by R B Hiralal

असोदा (जि० बिलासपुर) में प्राप्त ताम्रलेख का कुछ अंश।

चेदि सं ९१२

... ...

पृथ्वीदेव समुद्भवः समभवद्राजाल्लदेवीसुतः
शूरः सज्जनवाञ्छितार्थफलदः कल्पद्रुमः श्रीफलः ।
सर्वेषामुचितोऽर्चने सुमनसां नीश्शारिपक्कण्टकः
पश्यत्कान्तनराङ्गनाङ्ग मदनो **जाजल्लदेवो** नृपः ॥९॥

तस्यात्मजः **सकल कोसलमण्डनश्रीः**
श्रीमान् समाहृतसमस्तनराधिपश्रीः ।
सर्वक्षितीश्वरशिरोविनिताविलेव
सेवाभृतान्निविरसो भुवि **रत्नदेवः** ॥१०॥

पृथ्वीदेवस्ततो जात पोत कण्ठीरवादिव ।
सिंहसंहननो योऽरिकरियूथमपोथयत ॥११॥

तस्मात् त्र्यम्बकपादपद्ममधुपो **जाजल्लदेवो**ऽभवत ।
वीरारातिनितम्बिनीमुखपयोजन्मोपथीशोदय ॥1st half of verse no. 12

.

धीरू महाग्राह गृहीतमूर्तिः **जाजल्लदेवो** नृपतिः बभूव ।
यक्षेण मुक्तः समवाप्य राज्यं ग्रामं ददौ पुण्य दिने द्विजाभ्याम् ॥१९॥

. .

वास्तव्यवंशकमलाकरचित्रभानुः शत्रुप्रवीरविकलेन्धनचित्रभानुः ।
श्रीवत्सराजतनय खलु **धर्मराजो** जडेरनाथ इह नाम्रमिदं लिलेख ॥

---

* सरसों ताम्रपत्र (चेदिस ८८०) Jandera village

रत्नपुर में प्राप्त बादल-महल वाले शिलालेख का कुछ अंश

चेदि स ९१५

उत्फुल्लाम्बुजसौरभातिगरिमोद्भूतद्विरेफावलि
रामाद्रे पवनोल्लसत्कदलिका रोचिष्णुभिर्भूषितम्।
उद्याने कलकण्ठकूजितभरव्याकुलप्रपापाथ
अस्ति श्रीतलहारि मण्डलमिद विश्वम्भराभूषणम् ॥५॥
उन्मीलन्नवनीलनीरजवने नाय मरन्दस्पृहा-
भ्राम्यद्भूरिमधुव्रतालिनिस्वनैराचालदिङ्मण्डले।
सङ्गीतिध्वनिपूर्ण कर्णकुहरैरव्यापक कौतुका
अन्तर्नामिगणस्य यत्र पठित नानाद्य मा कम्पयन् ॥६॥

इहफणिपतिराकानारस्पृ स्पृग
प्रचुररजनरत गीरहीगादिकानाम।
स्पृशति यशमितुभ्रे यस्य दिक्चक्रवाल
शशधरकर बुध्याऽऽप्यापि धावन्ति सो का ॥७॥
यत्प्राटकस्तिविघूमतनी स्पृशन्ती
व्योमाङ्गण मदिनि कोकवधूर्निलापस्य।
नामारतन्ति शिखिना श्रुतिमार धाप
मालोडिता जलदजालमियद् ध्वाङ्क्षि ॥८॥

पृथ्वीपाल ततोऽभूत्स्वलकलितत्रू स्वदगात्ततां
समाम पन्थगत्तो रिपु धरणिभुजा **शूरदेवा**पिन श्री ॥
तषां तारा मजात्त स्तुवित गुणगणे शान्तिमात्रानाल्प
स्पृष्ट्वागापि क्षणाय नयति निजतनु पात्रता भीरुताया ॥९॥

× × × ×

सौदामन्दिरमिन्दुगौरयशास शौर्यस्य विस्तार भू
स्तुमन्दकिरामणी समजनि **श्रीब्रह्मदेव**स्तत ॥

निस्त्रिंशाहतवैरिवीरतरुणीसीमन्तचन्द्राम्बुद-
प्रोद्यच्चक्रवनान्धकाररसितर्दाप्ति क्षितौ डिण्डिमम् ॥११॥

\+ \+

भ्राजिष्णुर्मदमत्तवारणगणे श्रीमन्नृसिंहोऽच्युतः
प्रोद्यच्चक्रधरो द्विजातिदयितासन्तापनुच्चन्द्रमाः ॥
जित्वा कोटिकदम्बचक्रनृपतीन् दानेषुकर्णोज्झित-
श्रीमद्रत्नपुरे ररात्र मतिमान नागप्रकाण्डस्मृतिः ॥१३॥

\+ \+

प्रासाद रम्य चन्द्राशु कुन्दसुन्दर शेवधिम् ।
पृथ्वीदेवनरेन्द्राय पुण्यं पुण्यात्मने ददौ ॥२५॥

... ...

निर्व्यूढः कविपद्धतौ धुरिसनां वहारपदं संततम्
यद्राकापति सुप्रसादिमतिमान साहित्यकाव्याम्बुधि ।
आसीद्विस्तृतकीर्तियस्तु पटलप्राप्तप्रतिष्ठाश्रियः
नीहागारलसन नृपाल विबुधं गोविन्दपादोद्भवः ॥४०॥
विधुरिवदुग्ध पयोधि प्रसारिन गुणगणप्रसादिताशः
फलविचित्रानुत्तमपालित सकल द्विजन्मनां पूगः ॥४१॥
घनरसमयी गंभीरा शुभ्रतरां विचाररमणीयाम् ।
सरसीमिव प्रशस्ति त्रिभुवनपालो व्यधान विबुधः ॥४२॥
यावन्मण्डलमम्बरेऽमरगणैश्चण्डीश चूडामणिः
चन्द्रः सान्द्रकलाकलापरुचिरैं यावन्मृडानीपतिः ।
गंगासूर्यसुतादि पद्म सदनः कौमोदकी लक्ष्मणः
तावत्कीर्तिरियं चकास्तु विशदा विश्वम्भरा मण्डले ॥

रत्नपुर (जि विलासपुर) मे प्राप्त शिलालेख के कुछ श्लोक

× × × ×

× × × **गोविन्द** चद्रिमण्डलात् ।

कृतिकालक्रमेणासौ देशान **तुम्माण**मागत ॥८॥

पुत्रस्तस्य जनानुरागजलधिर्भूभृत सभाभूषणो

ज्यायान पण्डितपुण्डरीकतरणि **मामे**ऽभिधानोऽभवत ॥

यो धात्री तिलको लङ्कारहारोपमो

निर्यातस्त्रिपुरान्तकचरणाम्भोजैक भृङ्गो भुवि । ६॥

भ्राता नीरावगो मुख्य कनीयान गुणसागर ।

नागरो भुवनाभागा भूपापूपोपमो नमो ॥१०॥

श्रीमामेतनय समस्त जगती कीर्णस्फुरत्

कुन्दन्दुद्युति कीर्त्ति सन्तति लता व्यासक्तदिङ्मण्डपै

राजत्युन्मदवादिवृन्ददलनो लीलाविहार श्रिय

शीलाचार्यविवेकपुण्यनिलय **श्रीरत्नसिह** कवि ॥११॥

× × × × × ×

ताभ्यामजायत जगत्त्रयघुष्टकीर्ति ।

आखण्डितारिवुधमण्डल चण्डदर्प ।

चण्डीशचारुचरणाम्बुजचञ्चरीक

प्रज्ञा (निधि) **देवगण**स्तनूज ॥१३॥

× × × ×

चक्रे **देवगणो** धाम त्रिनेत्रपाणि पिनाकिन

शम्भो ग्राम तुषाराद्रिशिखराभोगभासुरम् ॥१४॥

× × × × × ×

नि शेषागमशुद्धबोधविभव काव्येषु यो भव्यधी

सत्तर्काम्बुधिपारगो भृगुसुतो यो दण्डनीतौ मन ।

छन्दोलङ्कृतिशब्दमन्मथकला शास्त्राब्जचण्डद्युति

श्रीमद्‌ **देवगण** प्रशस्तिममलां **श्रीरत्नसिहात्मज** ॥२६॥

मल्हार (जि० बिलासपुर) में प्राप्त शिलालेखका अंश-विशेष ।

चेदि सं ९१९

आसीच्छ्रीमध्यदेशे विततसुरनदीवारिपूरोर्म्मिमाला—
लङ्कारे हारभूते निखिलजनपदोद्दाम भू-मण्डलस्य ॥
ग्रामो रामोरुभूमिद्विजवरवसतिः "कुम्भटी" नामधेयो
यत्नात् स्वर्गैकखण्डप्रतिनिधिरमलो निर्मितो यो विधात्रा ॥९॥

From कुम्भटी came to तुम्माण one Gangādhar, son of Prithvidhar, whom king Ratnadeva gave a village named कोसाम्बो

ततः कालक्रमेणासौ देशं तुम्माणमागतः ।
गुणग्रामार्जितप्रौढ़लक्ष्मोर्द्विजशिरोमणिः ॥१२॥
प्रक्षाल्य चरणाम्भोजे **रत्नदेवो** महीपतिः ।
कोसाम्बि ग्राममेतस्मै उदकीकृत्य दत्तवान् ॥१३॥
श्रीगङ्गाधरत सुनोऽजनि जगद्वन्द्यैकपादोनुजः
प्रौढ़ानन्दकरः कलङ्करहितः रफायन् कलाना निधिः ।
बिभ्राणो द्विजराजता हतजड़ास्लेपोरुभूरिप्रभा
धात्रीमण्डलमण्डनो विधुरसौ श्री**सोमराजो** परः ॥१४॥
मीमासाद्वय पारगो गुरुरसौ यः काश्यपीयेनये
साख्ये च प्रतिमल्लनामदनिधि' व्यक्षाक्षपादाक्तिद्कू
यश्चार्वाकविशालमानदलनो दुर्वारबौद्धाम्बुधेः
पाना नन्दित कुम्भसम्भवमुनिर्दिग्वाससामन्तऽक ॥१५॥
अश्रान्तं क्रतुकुण्डमण्डलचलद् धूमावली श्यामल
व्योमाशा वलयं विलोक्य विलसन नीलाम्बुदालीभ्रमान
विप्राम्येरित वेदराशिविततोद्घोपोद्धुरं यद् गृहे
सत्पक्षप्रसरा नटन्ति,पटवा हृष्टा मुहुः केकिन. ॥१६॥

× × ×

वानाहतिचलत्तूलनरल जीवित नृणाम् ।
चञ्चला च श्रिय मत्वा धर्मं मतिमधाद्बुध ॥
तत्र **केदारदेवस्य** धाम **मल्लाल-पट्टने**
धीमता कारित रम्य स्वयशोराशि भासुरम् ॥२१॥
× × × ×
काश्यपीयाक्षपादीय नयसिद्धान्तवेदिना
त्रिपक्षमादिसिंहेन **रत्नसिंहेन** धीमता ॥२३॥
श्रीराघव
लब्धोदयप्रनतशास्त्रमहीरुहेण ।
वास्तव्यनशकमलाकरभानुनयम्
मामे-सुतन रचिता रुचिरा प्रशस्ति ॥२४॥

शवरीनारायण (जि० बिलासपुर) के महादेवमन्दिरका शिलालेख

चेदि स ९१९

× × × ×
सूर्याचन्द्रमसौ सम हुतभुजा यस्य त्रयी चक्षुषाम्
उच्छ्वासेषु महत्तनावसुमती यस्योत्तमाङ्गे पय ।
व्योम श्रोत्रचरं चिराय परमानन्दात्मरूपाश्रयम्
सर्वमजगत शमीश्वरस्सदा य शेषमूर्त्ति शिवम् ॥१॥
× × × +
तथा **कलिङ्गराजो**ऽभून भूपतीना शिरोमणि ।
पालयन सवभूतानि प्रजापुत्रानिवौरसान ॥६॥
× × × ×

पृथ्वीदेवः प्रजानाथः प्रथमोऽत्र बभूव यः
तस्य **श्रीसर्वदेवो**ऽभूज्जिष्णोर्विष्णुरिवानुजः ॥११॥

× × × ×

दायादांशतया तेन प्राप्ता सोण्ठिव पट्टिका ।
पुरन्देव श्रीमज्झिराश्रित' चारु मन्दिरम् ॥१३॥

× × × ×

आरुह्यमान सिद्धि करिणं करकलित चण्डकोदण्ड ।
चेदीशसैन्यचक्रं यश्चक्रे नाराचजर्जरम् ॥२८॥

× × × ×

इति बलममुना हतावशेषी कृतमभिवीक्ष्य समाजगाम **चेद्यः** ।
उरग इव पदाहत' प्रकोपं दधदधिकं स्वयमेव पराक्रमेषु ॥३०॥

अकारि सोण्ठिवपुरे शम्भोरभ्रंकषं सदः ।
सरोपि स्फारमारामः **सर्वदेवेन** सुन्दरः ॥३५॥

.. . .. .

कुन्देन्दु द्युतिसोदरं पुरभिदः प्रासादमभ्रंकषं
रम्यं चूतवनं तथा पथरिया ग्रामे क्वणत् कोकिलम् ।
विस्तीर्णं च सरः सरोजविपिनं व्यासङ्गिभृङ्गाङ्गना—
झङ्कारैः सुखिताध्वनीननिवहं **श्रीराजदेवो** व्यधात् ॥३७॥

वणारि नाम्नि विदधे ग्रामे रम्यं सरोवरम्
राभल्लदेवी **पजणी** ग्रामे चूतवनन्तथा ॥३८॥

× × ×

आमणदेवः समभूद्दुल्हणदेवात्मजः क्षितौ ख्यातः ।
पुत्रविशेषप्रेम्णा **जाजल्ल**नरेश्वरेण यो दृष्ट ॥३९॥

इय सहस्रार्जुनवंशजेन कुतूहलात्क्षत्रिय पुङ्गवेन ।
कुमारपालेन गुणाभिराम रामेव रम्या रचिता प्रशस्तिः ॥४०॥

× × ×

प्रददौ चन्द्रचूडाय चिचोलीग्राममादरात्
नैवेद्य धूपदीपादि सर्व्वोपकरणाय स ॥४३॥

अभूवन्भूपाला कति न निखिलक्ष्मावलभुजो
न तेषामप्यासीदवनिरचलापि स्थिरतरा ।
विमुच्य व्यामोह सततमिह दृशाधिपतिभि
र्भविष्यद्भिः पाल्य सुकृतमिद म कीर्त्तनमत ॥४४॥

खरौद (जि० बिलासपुर) का शिलालेख ।

चेदि स ९३३

श्री**कोकल्ल**नृपस्तदन्वयभवस्तत्सूनवोष्टादश
ख्यातास्तेषु लघु **कलिङ्ग** नृपतिर्व्वङ्केश्वराराधनात् ।
तुम्माणाधिपति सुतोस्य**कमल** **श्रीरत्नराज**स्तत
पृथ्वीदेव नरेश्वरोऽभवदत क्षोणीशचूडामणि ॥५॥
जाजल्लदेव नृपतिस्तत्सूनुरभूत्**सुवर्णपुर**नाथम्
भुजबलमवलम्चक्रे निजभुजबलेन समीरे य ॥६॥
आसीत्तत्तनयो नयोचितमति क्षोणीशचूडामणि-
श्रेणीशश्च **श्रीरत्नदेवो** नृप ।
लोकालोक गिरीन्द्रकन्दरदरी विश्रान्त विद्याधरी
वक्त्रेन्दुद्युति जाल मानस यशोराशि प्रवीरामणी ॥७॥
यश्चो**ड़गङ्ग**नृपति कलिङ्गदेशाधिप गजाधीशम् ।
समिति**जटेश्वर**जनक कनकाश्वगजान् जितवान् ॥८॥
पृथ्वीदेव नृपस्तत समभवद्यन्मौलि दशोल्लसत्
रत्नार्चिर्निचयेन रञ्जितमुमाभर्त्तुं पदाब्जद्वयम् ॥

जित्वा येन **जटेश्वरो** नरपतिः संख्ये स्वदोर्विक्रमं
धीराणां बलवीर्यबुद्धि विशदं श्रेष्ठं पर प्राणिनाम् ॥६॥

.. ...

तस्मा**ज्जाजल्लदेवो**ऽभूज्जनानां जनकोपमः
अजस्रं यद्गुणग्रामं वर्णयन्ति महीभुजः ॥११॥

... ...

ज्यायांस्तस्य **जगद्देव**स्ततः प्राग्देशतोऽञ्जसा
समेत्य राज्याधिपतिर्बभूवाद्भुतविक्रमः ॥१३॥

× .. ...

पुत्रस्ताभ्यां त्रिदशवनिता गीतकीर्तिः पृथिव्याम्
.. .. **रत्नदेव**प्रवीरः ॥१६॥

संस्कृतादिपदन्यास वैचित्री चित्रदायिनी
जिह्वारङ्गाङ्गणे यस्य नरिनर्ति सरस्वती ॥१८॥

. . .

ताभ्यामजायत गुणोत्कर रत्नसिन्धु
गङ्गाधरोऽद्भुतमतिः सुजनैकबन्धु ।
धन्यास्य यत्क्षणमपीह परोपकारा-
दन्यत्कदाचिदपि न व्यसनस्बभूव ॥२३॥

. ... ..

यावल्लीलावतीनां नयनसरसिजप्रान्तसंस्थोमनोभू
र्यावन्मैनाकपक्षानिलचटुलचलद्वीचिमाल पयोधिः ।
चन्द्रार्कौयावदेतौ गगनतल समुद्द्योतमानौ प्रभाभि
स्तावद्**गङ्गाधरस्य** प्रवरगुणनिधे स्थेयतामेतुकीर्तिः ॥४१॥

दक्षोलक्षणनिर्णये कविकला सर्वत्रविद्याप्रसु-
च्छन्दःसुन्दरबुद्धिरद्भुतमति साहित्यचाणक्ययोः
ख्यातो हैहयवंशभूः कविदशा यस्यानुजो जन्हुवान्
तेनाऽकारि **कुमारपाल** कृतिना श्रेष्ठा प्रशस्तिर्मुदा ॥४२॥

चेदि सं ९३३.

खलारी (जिला रायपुर) में प्राप्त श्रीनारायण-मन्दिर की प्रशस्ति वाला शिला-लेख ।

सकलदुरितहर्त्ताऽभीष्टसिद्धिप्रकर्त्ता
निगमसमुपगीतः शेषयज्ञोपवीतः ।
ललितमधुकराली सङ्गिनो गण्डपाली
तटभुवि गणराजः पातु वो विघ्नराजः ॥१॥
वर्णानाराध्य यया पठति भगवती यामनायस्तचित्त
श्रीकण्ठस्यापि नादरपहरति मनः पार्वती विभ्रमैभि ।
हारा नारायणस्योरसि रहसि रणत्कङ्कणा यद्भुजा स्यु
सद्य सन्ताय सिद्धौ स्फुरति कविमुखाम्भोरुह भारती सा ॥२॥
ब्रह्मादयो त्रिदिशसः श्रुतिकाव्यदृष्ट्या
ध्यायन्ति य पुरुषमात्मविनोप्यमूर्त्तम् ।
पापानि यत्स्मरणतो विलय प्रयान्ति
नारायण स्फुरतु चेतसि सर्वदा व ॥३॥
अहि-हय-नृपवंशे शम्भुभक्तोऽवनीश
कलचुरिरिति शाखां प्राप्य तीव्रप्रताप ॥
निजभुजगुरुदर्पाद्यारिदुर्गाण्यजैषी—
द्रण भुवि दश चाष्टौ **सिम्हण**क्षौणिपाल ॥४॥
अभवदवनिपालस्तत्सुतो **रामदेव**
समरशिरसि धीरो यत **भोणिङ्गदेव** ।
मणिरिव **फणिवंश**स्याहव कोपदम्भा
नगणतरगिनज पुञ्जराजन प्रताप ॥५॥
तत्पुत्र शत्रुहन्ता जगति विजयते चन्द्रचूडस्य भक्त-
स्याम कामाभिरामो मनसि मृगदृशामुङ्गनाना कृतान्त ।

सर्वेषां याचकानां स्फुरदमरतरुः वाक्पतिः पण्डितानां
गीतज्ञानाद्द्वितीयो भरत इव नृपः श्रीहरिः ब्रह्मदेवः ॥६॥

तद्राजधानी नगरी गरिष्ठा
खल्वाटिका राजति वाटिकाभिः ।
सुरालया यत्र हिमालयाभा
विभान्ति शृङ्गै रविगुप्तशृङ्गैः ॥७॥
भूदेवा यत्र वेदाध्ययनमनुरता स्वस्तिमन्तो वसन्ति
श्रीमन्तः श्रीविलासैरमरपरिवृढं राजराजं हसन्तः ।
कामिन्यः कामदेवं त्रिपुरहरहृशादग्धमुज्जीवयन्त्यः
प्रोद्यद्दोर्मूल कान्त्या स्मित मधुरगिरः भ्रूलताटस्वरेण ॥८॥

× × × ×

हरिचरणसरोजध्यानपीयूषसिन्धु
प्रसरदलघुवेला स्फालकेलीरसेन ।
सरसकविजनानां निर्मितेयं प्रशस्तिः
मनसि रसविधात्री मिश्र-दामोदरेण ॥११॥

× × × ×

स्वस्तिश्री संवत १४७० वर्षे शाके १३३४ प्लवनाम संवत्सरे माघ सुदि ६ शनिवासरे ।

हैहयवंशीय राजा वाहरेन्द्र के शासनकालका शिलालेख

(१)

सिद्धिः ॥ श्रीगणेशायनम ......लम्बोदरः पातु वः ॥१॥
आनन्दाम्बुधि.. .. ..भगवानर्द्धेन्दुचूडामणिः ॥२॥
या शश्वन्नवरात्रिपुप्रतिदिनं पूजाविधाने शुभै
एकैकोत्तरवृद्धितः पशुगणैरन्नैरनेकैः फलैः ।

सन्तुष्टा जननी जगत्रयहिता मय्य प्रसन्ना च सा
दुर्गा **बाहरभूपते** (स्थिरतर)म्पायन्पायाज्जगत् ॥३॥

तद्वंशेऽजनि **हैहय**विनिपतिर्मूर्त्तं प्रतापानल

× × × ×

आनन्दोऽखिलभूमिनाभिकमल श्रीकार्त्तवीर्य्यार्जुन ॥५॥

तत **सिंघण** (भूपालो) **हरब्रह्म**स्तदनन्तर
ततोऽपि **मदनब्रह्मा रामचन्द्र**स्ततो भवत् ॥६॥

रत्नसेनस्ततो राजा रामचन्द्रात्मजो भवत्
(पावनी) नाम तत्पत्नी गुणालङ्कार भासुरा ॥७॥

हरिश्चन्द्रश्चन्द्र क्षितितलमिलत्स्मयनिवहो
महोदार शूर परपुरपुरारातिरतुल ।
कुमार स्मिमार किमिह सहदेव स नकुल
कुमारस्तस्यासीदखिलरिपुहा **बाहर**-नृप ॥८॥

यत्नानीत स्वर्णमुष्टं **पठाणान्**
जित्वा युद्धे धातवोऽन्ये गजाश्वा
गावस्संख्यातीतसंख्या महिष्य

स्तोय मन्त्री **माधवो** मन्त्रसिद्ध ॥१७॥

नानाशास्त्रैर्नानाविज्ञानधर्म्मै
र्बुद्धो सम्यक् बोधयन् बाहरेन्द्रम् ।
सप्तग्राय सामवाद पुरोधा
विद्वानास्ते **देवदत्त** त्रिपाठी ॥१८॥

शाखाय क्रतुशालिन निजयशस्तम्भाय सभादिन
कोसङ्गस्य च (मार्गदशान्गृह) दत्वा प्रशस्त कृत

कर्णाटागत नागनाथविदुषं श्रीवाहरक्ष्मापतिः

प्रादान्मत्तमतङ्गभङ्गनिपुणः मत्तेभमत्युन्नतम् ॥१६॥

× × × ×

वादाहव(चिरख्यातः काव्यशास्त्रे सुपण्डितः)

नागनाथः सुधीरेनां प्रशस्तिमतनोन्मुदा ॥२२॥

कोसङ्ग दुर्गेश्वर घाटमदेव का शिलालेख।

संवत १५७० विक्रम †

शत्रुस्तम्भनयो नयैकानलयो येनैव दस्युर्धृतः
दुर्गं स्वर्गसमं..............................।

× × × विजयिना श्रीघाटमेनामुना ॥११॥

दानैर्यो बलिवद्विशिष्ट चरितैर्भोजवद्विक्रम-
प्राया विक्रमकारिताभिरिह य· शीलैश्च यः सिन्धुवत्
रूपैर्यः स्मरवत् यशोभिरमलैर्यो रामचन्द्रोपमं
(वीर्ये वैरि·)कुलाचलैककुलिशः श्रीघाटमःक्ष्मातले ॥१२॥

× × × ×

श्रीमद्वाहरभूपतेरनुचरः कोसङ्गदुर्गेश्वरः

द्वारः कारित ...... घाटम्मदेवोऽधुना ॥१६॥

---

† We are indebted to Babu Mahavira Prasad Shrivastava B Sc., for his kind help in finding this date from the damaged portion सं.. ..विक्रमनाम संवत्सरे आश्विन वदि सोमे. .as given at the end of the record

सिहावा (जिला-रायपुर) के कर्णेश्वरमन्दिर का शिलालेख।

शक सं ११९४=सन ई ११९१–९२

तत्पातुवस्त्रिनयमीश्वरलोचनानाम् ।
अग्न्यर्कसोममयमूर्तिभर समन्तात ॥
यल्लोकदु सन्हनप्रनिलामनादि
स्वाप्यायनानि कृपयानुदिन करोति ॥१॥

In पुरुरवा s family there was one सिंहराज whose son was घासराज, from whom was born चोपदृव whose son was कर्णराज। (slokas 2 to 5)

तस्मादभू नृपतिमण्डलमण्डनश्री
श्रीकर्णराज नृपनिनिदितप्रताप ।
यन्न्यायवत्तनकृपाणभयात्प्रचण्डु
काकैरदशममल न फलि समर्थ ॥६॥

× × × ×

तीर्थे दवहृ तन कृतं प्रासाद पञ्चकम्
स्वीयं तत्रैव जान यत्र शङ्करकशनो ।।८॥
पितृभ्यां प्रन्दो चान्य कारयित्वा द्वयनृप
सदन दवदवस्य मनोहारि शूलिन ॥१०॥
रणकेसरिणे प्रागान्नृपायैक सुरालयम्
तद्वश क्षीणतां ज्ञात्वा भ्रातृस्नहेन कर्णराट् ॥११॥

× × × ×

चतुर्दशोत्तर सेयमेकादशशत शक ।
वर्द्धतां सन्ततोनित्यं नृसिंह कविना कृता ॥१३॥

पुजारीपाली (स्टेट सारंगढ़) से प्राप्त गोपाल वीर के शिलालेख का कुछ अंश ।

Age —11th Century A D on palaeographic grounds The 1st two slokas are awfully damaged

शङ्खचक्रधरा देवी वैष्णवी गरुडासना ।
गोपालेन महा भक्त्या पुष्पैर्धूपैश्च पूजिता ॥३॥

× × × ×

वाराही घोरसंरावाचाग्रोद्धृतवसुन्धरा ।
नुता गोपाल वीरेण भक्तिभावेन सर्वदा ॥७॥

× × × ×

सिद्धिः सरस्वती गौरी कीर्त्तिः प्रतापऽपराजिता ।
आराधिता महाभक्त्या गोपालेन दिने दिने ॥१४॥

× × × ×

कंसदैत्यवधार्थाय विष्णुना या स्तुतास्वयम् ।
ता समाराध्य गोपालः वर्णनीय. सदाभवत् ॥३२॥

× × × ×

कोटि मन्त्र प्रभावेण पुनर्देवी वरं ददौ ।
अतुलं तव **गोपाल** ! बलवीर्यपराक्रमम् ॥३५॥

श्रीकेदारे प्रयागे च पुष्करे पुरुषोत्तमे ।
भीमेश्वरे नर्मदायां श्रीगोपालपुरे तथा ॥३८॥
वाराणस्यां प्रभासे च गङ्गासागरसङ्गमे ।
वरेलासीपतग्रामे श्रीवैराग्यमठे तथा ॥३९॥
अट्टहारे शौरिपुरे पेडरा ग्राम एव च ।
कीर्त्तिर्गोपालवीरस्य शरच्चन्द्रसमा भुवि ॥४०॥
कन्दर्प इव रूपेण गोपालः शौर्यसूचक ।
स्थाने स्थाने हयारूढो रेवन्त इव दृश्यते ॥४१॥

यो मम कुलपरवशो सुमति सभवनि मण्डने लोक ।
पालयतु कीर्त्तिमता चरणगतो नदनि गोपाल ॥४२॥
श्रीनश्वरणाब्जपूजनमनिन्नारायण सत्कवि ।
श्रीरामाभ्युदयाभिध रसमय काव्य स तद्यो व्यधान् ॥
स्मृत्यास्वादयदीय वाक्यरचना प्रादुर्भवन्निभर
प्रेम्णोल्लासिनचित्तवृत्तिरसुचनवाग्दवना वल्लभीम् ॥४३॥
* वरडा विपये नविकायां **गोपालेन** नमस्कृता ।

रत्नपुर (जिला बिलासपुर) के कर्णार्जुनीतालावके तटस्थित शिवमन्दिरवाला शिला लेख ।

शम्भोरम्भोधिनाय्यां शिरसि रसितपोदारधारातिशारा
मारादारुणमौसेश्वरसदा समुत्ताण्डन माम गम्यर् ।
स्तुत्वान्तरन रमाम्य त्रिदशजन गणेद्वारिसंसाज्यमाण
स्नानानतु साभान्तर्दिशतु गणगुरुमामणीश त्रिय व ॥१॥
श्रीमत्साद्र सुधास्पदाब्धि जगनामुत्तापपापापह
चैतन्य शनधिर्निधुर्विजयत काष्टाङ्गनामण्डन ॥
यद्वशे समजीजनस्थितिभृनामीश म२स्राजा ।
नस्य **श्रीमणिपत्तने** नृपनयो नशा यभूवु शन ॥

× × × ×

ननोऽभव**द्रत्नपुरा**धिनाथा
तात्रव्यनागाश्रमयूरयनो ।

---

* It is un dated The text of the inscription has not yet been pub lished or edited any where L P P

सुरेशतुल्याः श्रुतिवर्त्मशीला
मुकुन्दभक्ताः क्षितिपाग्रगण्या. ॥४॥

× × × ×

ततः कालक्रमेणैव कलौ महति चागते
जग्मुरस्तं महीपाला द्वापश्चाशन्मितास्ततः ।
वैक्रमेऽष्टादशशते तदाऽभूच्छत्रभूमिप.
श्रीमन्नागपुरीशानः स्वतारापनिपालितः ॥६॥

× × × ×

ततो गते द्वादशाब्दे दैवाद्रत्नपुरेऽभवत् ।
विम्बाजी भूपतिः श्रीमान नागपुर्य्यधिपात्मजः ॥८॥
अष्टाविंशतिवर्षमेव बुभुजे राज्यं प्रजावत्सलः
स श्रीरामगिरो चकार भगवच्छ्रीरामधामाद्भुतम् ।
चुम्बच्चन्द्रविमानचारुकलसं राजन् पताकाकुलं
कीर्तिं क्षोणितले निधाय नियते रायाम्बमुर्व्वीपतिः ॥९॥

× × × ×

श्रीमद्रत्नपुरे पद्माकराः सन्ति सहस्रशः ।
तेषु कर्णार्जुनीयाख्यः कणदेवेन निर्मितः ॥३४॥

× × × ×

तस्य भीमस्य सदनं चाद्य वैश्येन धीमता ।
महराख्येन रुचिरमकारि विधुसुन्दरम् ॥३६॥

× × × ×

राधाकृष्णपदाम्भोजमकरन्दमधुव्रतः ।
रेवारामः सता दासो मुकुन्द-गुणकाव्यकृत ॥४०॥
तेनाकारि सुधामयीवसरसी सत्काव्यरूपोल्लसत्
नानालङ्कृतशब्दशक्तिमहदुल्लोलन्मरालास्पदा ।
सद्वर्णाम्बुजभूपिता सुरसिता विद्वन् मुदामोदिनी
सानन्दाय सता प्रशस्तिरमला भूयात्सभामण्डले ॥४१॥
वियत कल्लोलिनी लोलत कल्लोल कुल सिञ्चिता
विघ्नं निघ्नन्तु हेरम्बपन्नखा. सद्भिरचिता ॥४२॥

स १९२७ विक्रमीय ।

Appendix

महाकोसल-कीर्ति-कथनम् ।

In praise of Mahākōsala

महानदी, महामाया, महाशिव महाभवा ।
नृपा यत्र स देशोऽय महाकोसलसन्नक ॥१॥
महारत्ननिधिभिन्यो महाशक्तिधरो महान् ।
दीप्तोऽय दक्षिणाशाया दशो दक्षिणकोसल ॥२॥
शैले राजति नाट्यमण्डपमथ श्रीरामदुर्गेशुभे-*
शृङ्गे । सिंहपुरे च चित्तरचना-लीला शिल्पायामहो ।
नाना निर्झर-शैल गह्वर गृहा स्थाना पुरानत्वनो
यस्मिन सन्ति सुवर्णहीरकनिधि‡ सोऽय महाकोसल ॥३॥
यस्मिन सकलपननस्सुनिमलो रम्याम्रकूटोवरो
भक्तिप्रेमविधायकोऽहि भगवान् श्रीशौरिनारायण ।
श्रीगन्धरवपति कुलेश्वरशिवो राजीवनेत्रो हरि
र्नाथो यत्र नृसिंहनाथ इति वै स्यातो महाकोसल ॥४॥
शस्यश्यामलकान्तिपूरितरमा, रम्या निहङ्गावली
यस्मिन काननवाटिका सुनिमला चित्रोत्पला तण्डुला§ ।
चित्रा भूधरशृङ्गपर्वतपटा सोऽय सदा कीर्तित
श्रीसौन्दर्यकलाकलापकुशलो वन्द्यो महाकोसल ॥५॥
सौन्दर्यं शिवनाथ पुण्यपुलिने यत्रास्मिशान्तिप्रद
नृत्ये यत्र रता सुतैलनदिनी, हसोदका, मानदा- ।

---

* रामगढ (सरगुजाराज्य) के पहाडोपर प्राचीनतम नाट्यमण्डप है ।

† सिंहनपुर or सिंघनपुर (नहरपाली B N Ry—रायगढ़राज्य) ।

‡ सम्बलपुर नगर के निकट महानदीगर्भस्थित 'हीराकूद' स्थान ।

§ तण्डुला-नदी=तुण्डला या तण्डुला river, which flows through Raipur & Drug Dists C P

⊛ चित्रोत्पला (महानदी) सुतल (तेल नदी या तलवाहा नदी)

⊛ शिवनाथ, A river by that name हसोदका —हसदो or हासदेव नदी । मानदा—मान or मान्द river

रेवारामवसन्तकोकिलकलो यस्मिन सुधां वर्षति
पुण्यारण्यमयो महाकविकुलस्पर्धी महाकोसलः ॥६॥
यस्मिस्तिष्ठति पद्मलोचन इति ख्यातः मुनीर्थो महान
रेवाशोणविधौतरत्नधरणीश्रृङ्गाररामाद्रिकः ।
यस्मिन राजति शम्भुसेवितजला चित्रोत्पला प्रोज्वला,
सोऽयं कोशलनाथकीर्तिकलितो देशो महाकोसल: ॥७॥

लोचनप्रसाद पाण्डेय ।

प्रशस्तिकृतः कवयः ।

कोसल-कवि-नामावली

